# Kailasavarnanam

# श्रीकण्ठचरिते कैलासवर्णनम्

## Document Information

Text title : KailAsavarnanam from Shrikanthacharita

File name : kailAsavarNanamshrIkaNThacharitam.itx

Category : shiva

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrImaNkhakakavikRitaM shrIkaNThacharitam | chaturthaH sargaH kailAsavarNanam ||

Latest update : Ocober 8, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 8, 2023

*sanskritdocuments.org*

# श्रीकण्ठचरिते कैलासवर्णनम्

शशिशुभ्राः किरन्भासो हासो धनपतेर्दिशः ।
गिरिरस्तीह कैलासो निवासो वृषलक्ष्मणः ॥ १॥

बिम्बितैर्यो मृगैर्भाति सुटस्फाटिकसानुषु ।
कौतुकेन कृतो धात्रा राशिभिः शशिनामिव ॥ २॥

रश्मयोऽभ्रङ्कषा यस्य श्रयन्ते सरलश्रियः ।
मूले मृणालनालत्वं ब्रह्मासनसरोरुहः ॥ ३॥

यदंशुस्रोतसः सङ्गादुत्तमाङ्गेऽपि धूर्जटेः ।
नेन्दुः क्षीरोदकल्लोलनिवासप्रीतिमुज्झितः ॥ ४॥

सर्वतोऽपि प्रनृत्यद्भिर्यश्चकास्ति गभस्तिभिः ।
लिखन्मुसेषु ककुभां कर्पूरस्थासकानिव ॥ ५॥

पादैर्महद्भिराक्रान्तदिगन्तो यः सितद्युतिः ।
विमर्ति क्षममात्मानं भोक्तु नवसुधाभरम् ॥ ६॥

जहाति यस्य लिम्पद्भिः करैराचान्तकालिमा ।
जलदः प्रावृषेण्योऽपि न शारदपयोदताम् ॥ ७॥

सगुहां प्रकटाहीनकटकां दधदाकृतिम् ।
सदापिनाकमाक्रम्य स्थितः पादवलद्गणः ॥ ८॥

दधानोऽधिगतश्वेतसानुरहशरीरताम् ।
स्वसाम्यमिव यो नीतः सेवाप्रीतेन शम्भुना ॥ ९॥

आबद्धपरिवेषस्य रश्मिभिः स्फटिकाश्मनाम् ।
प्रदक्षिणमप्रवृत्तेव राजते यस्य जाह्नवी ॥ १०॥

धत्तेंऽशुभिः समालब्धां भर्गनेत्रहविर्भुजः ।
यो मूर्तिं रोहणं जेतुं पद्मरागमयीमिव ॥ ११॥

यत्र स्फटिकतेजोभिर्भर्गस्य च गलत्विषा ।
रजन्यपि दिनंमन्या रात्रिंमन्यं भवत्यहः ॥ १२॥

दिक्षु द्युतिभिरेणाङ्कगभस्तिप्रतिवस्तुभिः ।
यशांसि वर्षता येन राजन्वन्तो महीभृतः ॥ १२॥

नृत्यद्भवपदक्षुण्णयत्क्षोणीरेणुविप्रुषः ।
भनिभेन नभो नूनं नक्तं नक्तमुपासते ॥ १४॥

शिववाहखुरोपज्ञजातरूपसमृद्धिभिः ।
क्षणान्मेरुसहस्त्रं यः सूते शैलप्रजापतिः ॥ १५॥

यत्र नेत्रानलः शम्भोः प्रतिबिम्बावलम्बनात् ।
कल्पतेऽनल्पदावाग्निशिल्पकृद्रत्नसानुषु ॥ १६॥

रुद्रोत्तंसविधूद्रेकद्रवच्चन्द्राश्मजन्मभिः ।
प्रवाहैरिव यः सख्यं कचिन्नोज्झति निर्झरैः ॥ १७॥

किंस्विद्गौरीहरेर्भीत्या विनीत्या किमु धूर्जटेः ।
दूराद्रथमृगं तयत्त्वा यं मृदुः सेवतेऽनिलः ॥ १८॥

दरीषु किंनरीलोकं धत्ते यः प्लोषविलप्लवे ।
न्यासीकृतमनङ्गेन भाण्डागारमिव स्वकम् ॥ १९॥

श्वेतास्मकुहरैर्मध्यसुप्तश्याभ्रमण्डलैः ।
व्यनक्ति यः शैलवृपा सहस्त्रमिव चक्षुषाम् ॥ २०॥

अवगूढो दृढं देव्या पौलस्त्येभुजनर्तिते ।
यत्र क्षणं विभुर्लेभे दोलाकेलिरसज्ञताम् ॥ २१॥

अत्युन्नतस्य पादेषु क्षपासु लुठतेन्दुना ।
यस्य प्रभुरपि स्पर्धां नैति चन्द्रशिखामणिः ॥ २२॥

दिक्षु प्रसारितबृहत्प्रभापक्षतिसम्पुटः ।
यो मानसे जगल्लक्ष्मीकेलिहंस इव स्थितः ॥ २३॥

यो मध्यमध्यसङ्क्रान्तनवाभ्रकणशारितैः ।
लौहितीकतटैर्भाति स्वप्रशस्तिपटैरिव ॥ २४॥

स्फुलिङ्गभङ्गिभिर्मानोः प्रतिबिम्बैर्य ईक्ष्यते ।
राशिर्भूतैरिव त्र्यक्षप्लुष्टानां विश्वपाप्मनाम् ॥ २५॥

मानसास्कन्दनपटुः स्पृशन्नुत्कटकान्तताम् ।
दधानः सुखद रूः सिद्धसाध्यगणाश्रितः ॥ २६॥

सालकान्तस्थितिर्नीरुकण्ठाध्यासनपावनः ।
य इवाभाति यच्चित्रमहर्यक्षैस्तु सेव्यते ॥ २७॥

क्वचित्कवचितः सान्द्रनवाम्बुदकदम्बकैः ।
यो विमुद्रयति क्षोणीरञ्जद्रिमदद्रुहः ॥ २८॥

सीमन्तरेखा रोदस्योः क्षौमनीरङ्गिका दिशाम् ।
ककुप्कुञ्जरयूथस्य पुरोमुखपटच्छटा ॥ २९॥

द्वितीयभूतिर्भर्गस्य फेनश्रीर्मीनसाम्भसाम् ।
भूपन्नगस्त्रीनिर्मोको भाति यत्कान्तिसन्ततिः ॥ ३०॥

सङ्क्रान्तं यो वहत्यन्तर्वपुषि स्फाटिके जगत् ।
आचान्तमिव कल्पान्ते शिक्षया वृषलक्ष्मणः ॥ ३१॥

बिम्बितार्कधृतापाण्डुशरीरो यो विराजते ।
सान्द्रेरामञ्जरीपुष्पगुच्छोत्तंस इव क्षितौ ॥ ३२॥

स्फटिकाश्मसु यत्रास्ते बिम्बितो गुहबर्हिणः ।
दत्तयात्र इवाक्रष्टुमहीन्पाताल्वासिनः ॥ ३३॥

विश्वात्मने स्वनाथाय दिगम्बरदशाजुषे ।
वयतीवाम्बरं दिक्षु यस्ततैरंशुतन्तुभिः ॥ ३४॥

योऽश्रान्तशशभृत्सङ्गद्रवच्चन्द्राश्मशीकरैः ।
व्यनक्ति भगवत्पादपातानन्दाश्रुदुर्दिनम् ॥ ३५॥

यो बिभर्ति ज्वलत्तुङ्गपतङ्गाश्मगुहात्मना ।
दत्तां भगवता दृष्टिमह्नि वह्निमयीमिव ॥ ३६॥

ढौकितानन्तकुसुमप्रकरः पार्श्वपादपैः ।
कीर्णार्घो गिरिजासिंहकरजोन्मुक्तमौक्तिकैः ॥ ३७॥

धूपधूममभिव्यञ्जन्भरैर्नवपयोमुचाम् ।
दत्तदीपालिकः शृङ्गभज्वरत्तपनोपलैः ॥ ३८॥

स्नानानि यच्छन्नच्छिन्नमुच्छलद्भिरितस्ततः ।

नियनिःष्यन्दमानेन्दुद्दषत्सूतिभिरम्बुभिः ॥ ३९॥

सधातुनिर्झरारब्धसमालभनविभ्रमः ।
स्तुवन्दरीमुखैर्वातलहरीमुखरीकृतैः ॥ ४०॥

शुभोपकल्पितबलिर्नानाविधफलर्द्धिभिः ।
तटभस्तुतसङ्गीतभङ्गीको दिव्यचारणैः ॥ ४१॥

यो भस्मस्मेरसर्वाङ्गो निभृतां स्थितिमश्नुते ।
नित्यसन्निहितं देवदेवमभ्यर्चयन्निव ॥ ४२॥

धातुपाटलमुत्क्षेपपरिभूत्यपराधिनि ।
योऽद्यापीव मुखं धत्ते सकोपं दशकन्धरे ॥ ४३॥

सूर्यग्रावाग्निना दुन्वन्सिञ्चन्निन्दूपलद्रवैः ।
कोपभसादसम्भेद इव योऽनाङ्गदाहिनः ॥ ४४॥

सोरगाश्लेषनिःशेषतापघ्नस्थाणुसङ्गतेः ।
श्रीखण्डशैलं कुरुते यः साम्यानुग्रहातिथिम् ॥ ४५॥

दिवापि पतासु महेशशेखरप्रजागरूकेण कुरङ्गकेतुना ।
कदाचन प्रोषितभर्तृकाव्रतं शिखासु यस्यौषधिभिर्न शिक्षितम् ॥ ४६॥

शिखराध्वनि यस्य षट्पदद्युतिचौरा नवकेकिबन्धवः ।
ज्वलदोषधिदीप्तिसम्पदां दधते सम्भृतकज्जलश्रियम् ॥ ४७॥

तनुरनुपसरति श्रीसंस्तवं यस्य शृङ्गे-
ष्वनुरजनि सुधांशोर्मूर्तिभिर्बिम्बिताभिः ।
भरसहनभृतान्तस्तोषभर्गप्रसादी-
कृतनिजनृरकपालस्त्रक्सहस्राञ्चितेव ॥ ४८॥

स्फटिककटककुट्टिमेषु यस्य प्रतिमितयः खरतेजसो जुषन्ते ।
विचरणचणशर्ववाहपादप्रणयसमुद्गतजातरूपशोभाम् ॥ ४९॥

यस्याः सौरभकिङ्करीकृतमिलन्मत्तालिमालानिभा-
व्यज्यन्तेऽनवधिक्रुधो रतिपतेर्भ्रूभङ्गविच्छित्तयः ।
चित्रा चैत्ररथानिलस्य लहरी सा यत्र सञ्जायते
मानानध्ययनानाष्टमी शिशुतमीजीवातुभृत्सुभ्रुवः ॥ ५०॥

निह्नोतुं क्षणमीशते गणपतेर्येऽत्यूर्जितं गर्जितं

स्वैरं तारकवैरिवाहशिखिनो ये मौनमुद्राभिदः ।
ते यत्र स्तनितोर्मयो जलमुचां देवीहठालिङ्गन-
क्रीडासादरसौख्यदानपतितामायान्ति खद्वाङ्गिनः ॥ ५१॥

कालुष्यप्रागभावप्रणयिनि निबिडप्रावृडातङ्कनश्य-
द्धंसश्रेणीशरण्ये प्रकटतटलुठद्वीचिलेखाजटाले ।
यो मुख्ये मानसाख्ये परिसरसरसि प्राप्तसङ्क्रान्तिरन्त-
र्भूलोकालोकनेच्छोज्जिगमिषदुरगाधीशभङ्गीं बिभर्ति ॥ ५२॥

क्व यस्य नक्तन्दिनचन्द्रिका न द्युतिर्द्युवीथीमुपतिष्ठमाना ।
सन्नद्धतां कन्दलयत्यशेषवर्णान्तरापह्नविप्लवाय ॥ ५३॥

या काप्युदात्ततरदक्षकुलप्रसूति-
र्या सेवते हरिपदाक्रमणक्षमत्वम् ।
तां तारकान्तकरजन्मशुभानुभावां
गौरीं तनुं वहति यो दयितां हरस्य ॥ ५४॥

दन्ता नितम्बभुवि पादतलेऽलकाप्ति-
र्योग्या पयोधरविवृत्तिषु मेखला च ।
यस्यास्तरङ्गितवलीमुखपृष्ठता च
यस्तां समुद्वहति मूर्तिमपूर्वकान्ताम् ॥ ५५॥

उद्वेल्लत्फटमुण्डखण्डसचिवैरुत्तत्तंसिता मूर्धभिः
प्रेङ्खत्पत्त्रकराश्रितालिलहरीरुद्राक्षमालाभृतः ।
रोहद्दीर्घजटास्तटेषु तपसि स्थेम्नेव यस्य द्रुमा-
स्ते तिष्ठन्त्यनिरोध एव मरुतामन्तं नयन्तो रजः ॥ ५६॥

यस्मिञ्जातु न जायतेऽम्बुजवतीकौमारधर्मक्षति-
र्दृष्टो यत्र न वा कदाचिद्दशनाभिज्ञश्चकोरीजनः ।
तस्मिन्नप्यहिचक्रवर्तिनगरोद्देशोपकण्ठे क्षणं
यन्मूलस्फटिकाश्मरश्मिपटलैः कोऽपि प्रकाशोदयः ॥ ५७॥

नैर्मल्यतस्तुलितसाधुजनाशयो यः
सङ्क्रान्तकोमलतमालतरुप्रकाण्डः ।
ज्योत्स्नासपत्नरुचिपीततमस्तरङ्ग-
सन्दर्भगर्भमिव कुक्षिमभिव्यनक्ति ॥ ५८॥

यो लम्बोदरकुम्भसम्भवमदस्रोतःसिरासीकर-
क्षुण्णः स्वःसरिदङ्कपङ्कजरजःसौगन्ध्यबन्धुश्च यः ।
वप्रेषु प्रसरः स यत्र मरुतामोजायते जायते
यत्सेवाप्रवणो गणे मधुलिहां मन्दारमन्दादरः ॥ ५९॥

यमदूरतस्त्रिजगदेककौतुकव्यवहारसर्गविधिनव्यवेधसम् ।
अलका विमुद्रबहुसौधसीहृदादनिमेषलोचनचयेव वीक्षते ॥ ६०॥

यस्याश्चकास्ति कटकेषु सहेलखेल-
द्विद्याधरीचरणयावकपङ्कमुद्रा ।
श्रीकण्ठनेत्रपथजानपदार्कसोम-
सेवाकृते सततसन्निहितेव सन्ध्या ॥ ६१॥

व्योमोलङ्घनजाङ्घिकेन वपुषा निःशेषकाष्ठाहठ-
क्रीडाश्लेषविटस्य कल्पितवतो ब्रह्माण्डमुत्कर्परम् ।
पातालाधिशयालुमूलमहसः शङ्के न यस्य प्रति-
स्पर्धावर्धनसाहसे बलभिदः शैलोऽपि सन्नह्यति ॥ ६२॥

दिवि क्षीरोदन्वान्हिमगिरिरजय्योऽर्कमहसा-
मजाताधःपातस्त्रिदशसरिदोघः कचति यः ।
वमञ्ज्योत्स्नाजालं दिशि दिशि सपत्नं शशिरुचां
चकोरीजिह्वाभिर्विरचितवृथालेहनविधिः ॥ ६३॥

द्विर्भावश्चन्द्रभासां तरुणकुमुदिनीनाथचूडाट्टहासा-
नुप्रासः शैलपुत्रीनवहसितसुधाविप्रुषां पौनरुक्त्यम् ।
स्वर्गङ्गावीचिवीप्सा रुचिरुपचिनुते चातुरीं यस्य तस्य
क्षोणीभर्तुर्गुणेषु प्रतिपदपठनं को विनिर्मातुमीष्टे ॥ ६४॥

इति श्रीमङ्खकस्य कृतौ श्रीकण्ठचरिते महाकाव्ये कैलासवर्णनम् ।

॥ श्रीमङ्खककविकृतं श्रीकण्ठचरितम् । चतुर्थः सर्गः - कैलासवर्णनम् ॥

.. shrImankhakakavikRitaM shrIkaNThacharitam . chaturthaH sargaH - kailAsavarNanam ..

Notes:

Śrīkaṇṭhacaritam श्रीकण्ठचरितम् is a Saṃskṛta Mahākāvya संस्कृत महाकाव्य composed by Mahākavi Maṅkhaka महाकवि मङ्खक - a 12th century poet from

Kashmir. The 25 sections of the Mahākāvya महाकाव्य describe the incidence of Tripuradāha त्रिपुरदाह and the annihilation of Tripurāsura त्रिपुरासुर by Śrīkaṇṭha श्रीकण्ठ (Śiva शिव).

Sarga 4 सर्ग ४ describes Mount Kailāsa कैलास, the Abode of Śrīkaṇṭha श्रीकण्ठ (Śiva शिव).

Encoded and proofread by Ruma Dewan

---

*Kailasavarnanam*

pdf was typeset on October 8, 2023

Please send corrections to *sanskrit@cheerful.com*